योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११८

अज्ञातलेखकः

सहचरसहचर्यः क्रमेणोचुः ।

निर्गुणस्य बकस्यास्य गुण एकोऽस्ति दृश्यताम् ।

यत्प्रावृषं स्मारयति प्रावृट् प्रावृडिति ब्रुवन् ।। १

बक हंस इवाभासि सरःस्थो मद्गुसौहृदम् ।

नृशंसत्वं च वाणीं च त्यक्त्वा हंसो भव स्फुटम् २

गम्भीरं वारिगर्भं प्रसृतजलचरं ये प्रविश्य प्रविश्य

प्राङ्गतत्स्यान्प्रोतचञ्चवश्चतुरतर परं जग्धवन्तो विदग्धाः

ते केनाप्यद्य दिष्ट्या मृततितिमिगमिताः कालयुक्ते महिम्ना

नाक्रामन्ति क्रमस्थाः सुहरमपि पुरः पङ्गवो मद्गवोऽमी ।। ३

एवं विहन्यते लोकः स्वार्थेनेति प्रदर्शयन् ।

मद्गुर्मद्गुरुतां यात इत्येवं स्तौति दुर्जनः ।। ४

उत्कन्धरो विततनिर्मलचारुपक्षो

हंसोऽयमत्र नभसीति जनैः प्रतीतः ।

गृह्णाति पल्वलजलाच्छफरीं यदासौ

ज्ञातस्तदा खलु बकोऽयमितीह लोकैः ।। ५

अतिबहुकालविलोलानवलोक्य बकांस्तपोदम्भान् ।

अत्रैवातिमिरस्थांस्तटवनिता विस्मिता धूर्तान् ।। ६

अत्र जले हिमहेलाः पश्यैता अपहरन्ति सितपद्मान् ।

इच्छसि ता अनुगन्तुं नाहं ते वल्लभा व्रजामीति ।। ७

कुपितां तामनुनेतुं यत्नपरः पान्थ एष पथि कान्ताम् ।

अवलोकय नरनायक कुसुमलताकुहरकेलितीरवने ।। ८

इति हावभावविलसितविवलनकोपार्धदृष्टिहसितानि ।

कुर्वाणा वरवनिता कथयति ते दृश्यतां राजन् ।। ९

बकमद्गुशरारूणां नित्यमेकौकसामपि ।

संकरोऽस्ति मिथो बुद्धेर्न मूर्खविदुषामिव ।। १०

चञ्चवग्रे खञ्जरीटस्य कीटः किटिकिटायते ।

दौर्भाग्यस्य पुराणस्य पताकेवोच्छ्रितोन्नते ।। ११

तारं तीरतरौ स रौति तरलो यावद्बकः प्रोल्लसं-

स्तावत्पल्वलगोष्पदेऽम्बुकलिले यावद्बलाद्देहकम् ।

मज्जन्त्या प्रियवक्षसीव निपुणं त्रातं शफर्या भया-

द्धृद्धङ्गेनमहापदीह हि मृतेनान्यद्भवेत्सौख्यदम् ।। १२

बकाजगरमद्गूनां हृदि या प्राणिनां धृतिः ।

अचर्वितनिगीर्णानां मन्ये निद्रोपमैव सा ।। १३

आसन्नमद्गुबकगृध्रबिडालसर्प-

दृष्ट्या भयं भवति यत्सलिलाशयानाम् ।

तस्याग्रतस्तृणमिवाशनिपातभङ्गो

जातिस्मरेण विदुषोक्तमदः पुरा मे ।। १४

इह सरोवरतीरतरोस्तले कुसुमशालिनि मुग्धमृगान्पुरः ।

समवलोकय लोकमलौ बला-त्समवकीर्णनवोत्पलकेतकान् ।। १५

बर्ही प्रोन्नतचित्तत्वात्तोयमिन्द्रं प्रयाचते ।

स पूरयति तेनास्य महात्मा निखिलां महीम् ।। १६

मेघाननुसरन्त्येते मयूरास्तनपा इव ।

मलिनो मलिनस्यैव पुत्र इत्यनुमीयते ।। १७

मृगानालोक्य पथिकश्चिन्तयन्दयितेक्षणे ।

पुरःस्थेषु पदार्थेषु यन्त्रपुत्रिकतां गतः ।। १८

शिखी वार्यपि नादत्ते भूमेर्भुङ्क्ते बलादहिम् ।

दौरात्म्यं तन्न जाने किं सर्पस्य शिखिनोऽथवा ।। १९

सज्जनाशयनीकाशं त्यक्त्वा बर्ही महत्सरः ।

पिबत्यम्ब्वभ्रनिष्ठ्यूतं मन्ये तन्नतिभीतितः ।। २०

लसत्कलापजलदाः पश्य नृत्यन्ति बर्हिणः ।

धुन्वानाः पिच्छकान्तीन्दुं प्रावृषः पोतका इव ।। २१

वरवने वनवातविसारिणां चपलचन्द्रकचारुतरङ्गिणाम् ।

इह पयोनिधिरेव कलापिनां विसृतमुक्ततयेव विलासनः ।। २२

चर तृणानि पिबाम्बु वनावनौ कलय विश्रमणं कदलीवने ।

चकितचातक पावकदूषिता न हि सुखाय भवत्यतिमानिता ।। २३

नायं मयूर मकरालयवारिपूरपूर्णोदरो जलधरोऽम्बरमारुरुक्षुः ।

दावाग्निदग्धवनपादपकोटराग्र धूमावलीवलय उत्थित एष शैलात् ।। २४

येनाब्देन शरद्विधावपि शिखी संतर्पितो वारिभि-

र्नो वर्षास्वपि पूरयेद्यदि सरस्तद्वाललोकोचितम् ।

आरब्धं समवेक्ष्य सज्जनजनो हासेन दुःस्थो भवे-

द्बर्हीत्यात्मतृषैव नेतुमखिलं कालं समभ्युद्यतः ।। २५

स्फटिकविमलं पीत्वा तोयं घनोदरनिर्गतं

पिबति न पुनर्मार्गे क्षुभ्यंस्तृषापि शिखी जलम् ।

स्फुरति च घनं स्मृत्वा स्मृत्वा न चापि विपद्यते

गुणवति जने बद्धाशानां श्रमोऽपि सुखावहः ।। २६

इहातिवाहयन्त्येते मार्गदौस्थ्यं घनागमे ।

कथाभिः पथिकाः प्रायो विमूढा जीवितं यथा ।। २७

पश्यात्र नाथ सरसः कमलोत्पलकुमुदबिसमृणालानाम् ।

कह्लारपत्रपयसा भारानादाय बालिकाश्चलिताः ।। २८

किमिदं नयथेति ततः पृष्टाभिस्ताभिरुक्तमेतस्य ।

व्यसनज्वरतप्तायाः पथिक वयं बालसख्य इति ।। २९

अथ रागरक्तहृदयाः स्तनभरवितता विलासललिताङ्ग्यः ।

पथिकानां स्मरणपथं भूयोऽप्यनयन्प्रियाः स्वगेहस्थाः ।। ३०

सा नूनं मम कान्ता दृष्ट्वा सुस्निग्धघनतमःश्यामम् ।

गगन च शून्यगहनं प्रलपति भुवि पतति विस्खलति ।। ३१

भृङ्गावलीकुवलयावलिताब्जपात्र-संप्रेर्यमाणनलिनीमधुपानमत्तः ।

हा वाति तीरतरुपल्लवलास्यलब्ध-

संमुग्धशब्दगणगीतगुणो नभस्वान् ।। ३२

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० नि० उ० अवि० वि० हरिणमयूरबकमुग्धादिवर्णनं नामाष्टादशाधिकशततमः सर्गः ।। ११८ ।।